# Natya Shastra Chapter 5

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૫

## Document Information

Text title : naaTyashaastra adhyaaya 5

File name : natya05.itx

Category : nATyashAstra, major_works, bharata

Location : doc_z_misc_major_works

Author : Sage Bharata

Transliterated by : dpadmakar at hotmail.com

Proofread by : dpadmakar at hotmail.com

Latest update : May 24, 2001

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# નાટ્યશાસ્ત્રમ્ અધ્યાયઃ ૫

॥ શ્રીરસ્તુ ॥

ભરતમુનિપ્રણીતં નાટ્યશાસ્ત્રમ્
અથ પૂર્વરઙ્ગવિધાનો નામ પઞ્ચમોઽધ્યાયઃ ।

ભરતસ્ય  વચઃ શ્રુત્વા નાટ્યસન્તાનકારણમ્ ।
પુનરેવાબ્રુવન્વાક્યમૃષયો હૃષ્ટમાનસાઃ ॥ ૧॥

યથા  નાટ્યસ્ય જન્મેદં જર્જરસ્ય ચ સમ્ભવઃ ।
વિઘ્નાનાં શમનં ચૈવ દૈવતાનાં ચ પૂજનમ્ ॥ ૨॥

તદસ્માભિઃ શ્રુતં સર્વં ગૃહીત્વા ચાવધારિતમ્ ।
નિખિલેન યથાતત્ત્વમિચ્છામો વેદિતું પુનઃ ॥ ૩॥

પૂર્વરઙ્ગં મહાતેજઃ સર્વલક્ષણસંયુતમ્ ।
યથા બુદ્ધ્યામહે બ્રહ્મંસ્તથા વ્યાખ્યાતુમર્હસિ ॥ ૪॥

તેષાં તુ વચનં શ્રુત્વા મુનીનાં ભરતો મુનિઃ ।
પ્રત્યુવાચ પુનર્વાક્યં પૂર્વરઙ્ગવિધિં પ્રતિ ॥ ૫॥

પૂર્વરઙ્ગં મહાભાગા ગદતો મે નિબોધત ।
પાદભાગાઃ કલાશ્ચૈવ પરિવર્તાસ્તથૈવ ચ ॥ ૬॥

યસ્માદ્રઙ્ગે પ્રયોગોઽયં પૂર્વમેવ પ્રયુજ્યતે ।
તસ્માદયં પૂર્વરઙ્ગો વિજ્ઞેયો દ્વિજસત્તમાઃ ॥ ૭॥

અસ્યાઙ્ગાનિ તુ કાર્યાણિ યથાવદનુપૂર્વશઃ ।
તન્ત્રીભાણ્ડસમાયોઅગૈઃ પાઠ્યયોગકૃતૈસ્તથા ॥ ૮॥

પ્રત્યાહારોઽવતરણં તથા હ્યારમ્ભ એવ ચ ।
આશ્રાવણા વક્ત્રપાણિસ્તથા ચ પરિઘટ્ટના ॥ ૯॥

સઙ્ઘોટના તતઃ કાર્યા માર્ગાસારિતમેવ ચ ।

જ્યેષ્ઠમધ્યકનિષ્ઠાનિ તથૈવાસારતાનિ ચ ॥ ૧૦॥

એતાનિ તુ બહિર્ગીતાન્યન્તર્યવનિકાગતૈઃ ।
પ્રયોક્તૃભિઃ પ્રયોજ્યાનિ તન્ત્રીભાણ્ડકૃતાનિ ચ ॥૧૧॥

તતઃ સર્વૈસ્તુ કુતપૈઃ સંયુક્તાનીહ કારયેત્ ।
વિઘટ્ય વૈ યવનિકાં નૃત્તપાઠ્યકૃતાનિ તુ ॥ ૧૨॥

ગીતાનાં મદ્રકાદીનાં યોજ્યમેકં તુ ગીતકમ્ ।
વર્ધમાનમથાપીહ તાણ્ડવં યત્ર યુજ્યતે ॥ ૧૩॥

તતશ્ચોત્થાપનં કાર્યં પરિવર્તનમેવ ચ ।
નાન્દી શુષ્કાવકૃષ્ટા ચ રઙ્ગદ્વારં તથૈવ ચ ॥ ૧૪॥

ચારિ ચૈવ તતઃ કાર્યા મહાચારી તથૈવ ચ ।
ત્રિકં પ્રરોચનાં ચાપિ પૂર્વરઙ્ગે ભવન્તિ હિ ॥ ૧૫॥

એતાન્યઙ્ગાનિ કાર્યાણિ પૂર્વરઙ્ગવિધૌ દ્વિજાઃ ।
એતેષાં લક્ષણમહં વ્યાખ્યાસ્યામ્યનુપૂર્વશઃ ॥ ૧૬॥

કુતપસ્ય તુ વિન્યાસઃ પ્રત્યાહાર ઇતિ સ્મૃતઃ ।
તથાવતરણં પ્રોક્તં ગાયિકાનાં નિવેશનમ્ ॥ ૧૭॥

પરિગીતક્રિયારમ્ભ આરમ્ભ ઇતિ કીર્તિતઃ ।
આતોદ્યરઞ્જનાર્થં તુ ભવેદાશ્રાવણાવિધિઃ ॥ ૧૮॥

વાદ્યવૃત્તિવિભાગાર્થં વક્ત્રપાણિર્વિધીયતે ।
તન્ત્ર્યોજઃકરણાર્થં તુ ભવેચ્ચ પરિઘટ્ટના ॥ ૧૯॥

તથા પાણિવિભાગાર્થં ભવેત્સંઘોટનાવિધિઃ ।
તન્ત્રીભાણ્ડસમાયોગાન્માર્ગાસારિતમિષ્યતે ॥ ૨૦॥

કલાપાતવિભાગાર્થં ભવેદાસારિતક્રિયા ।
કીર્તનાદ્દેવતાનાં ચ જ્ઞેયો ગીતવિધિસ્તથા ॥ ૨૧॥

[અતઃ પરં પ્રવક્ષ્યમિ હ્યુત્થાપનવિધિક્રિયામ્ ।]
યસ્માદુત્થાપયન્ત્યત્ર પ્રયોગં નાન્દિપાઠકાઃ ।
પૂર્વમેવ તુ રઙ્ગેઽસ્મિંસ્તસ્માદુત્થાપનં સ્મૃતમ્ ॥ ૨૨॥

યસ્માચ્ચ લોકપાલાનાં પરિવૃત્ય ચતુર્દિશમ્ ।
વન્દનાનિ પ્રકુર્વન્તિ તસ્માચ્ચ પરિવર્તનમ્ ॥ ૨૩॥

આશીર્વચનસંયુક્તા નિત્યં યસ્માત્પ્રયુજ્યતે ।
દેવદ્વિજનૃપાદીનાં તસ્માન્નાન્દીતિ સંજ્ઞિતા ॥ ૨૪॥

અત્ર શુષ્કાક્ષરૈરેવ હ્યવકૃષ્ટા ધ્રુવા યતઃ ।
તસ્માચ્છુષ્કાવકૃષ્ટેયં જર્જરશ્લોકદર્શિતા ॥ ૨૫॥

યસ્માદભિનયસ્ત્વત્ર પ્રથમં હ્યવતાર્યતે ।
રઙ્ગદ્વારમતો જ્ઞેયં વાગઙ્ગાભિનયાત્મકમ્ ॥ ૨૬॥

શ‍ૃઙ્ગારસ્ય પ્રચરણાચ્ચારી સમ્પરિકીર્તિતા ।
રૌદ્રપ્રચરણાચ્ચાપિ મહાચારીતિ કીર્તિતા ॥ ૨૭॥

વિદૂષકઃ સૂત્રધારસ્તથા વૈ પારિપાર્શ્વકઃ ।
યત્ર કુર્વન્તિ સઞ્જલ્પં તચ્ચાપિ ત્રિગતં મતમ્ ॥ ૨૮॥

ઉપક્ષેપેણ કાવ્યસ્ય હેતુયુક્તિસમાશ્રયા ।
સિદ્ધેનામન્ત્રણા યા તુ વિજ્ઞેયા સ પ્રરોચના ॥ ૨૯॥

અતઃ પરં પ્રવક્ષ્યામિ હ્યાશ્રાવણવિધિક્રિયામ્ ।
બહિર્ગીતવિધૌ સમ્યગુત્પત્તિં કારણં તથા ॥ ૩૦॥

ચિત્રદક્ષિણવૃતૌ તુ સપ્તરૂપે પ્રવર્તિતે ।
સોપોહને સનિર્ગીતે દેવસ્તુત્યભિનન્દિતે ॥ ૩૧॥

નારદાદ્યૈસ્તુ ગન્ધર્વૈઃ સભાયાં દેવદાનવાઃ ।
નિર્ગીતં શ્રાવિતાઃ સમ્યગ્લયતાલસમન્વિતમ્ ॥ ૩૨॥

તચ્છ્રુત્વા તુ સુખં ગાનં દેવસ્તુત્યભિનન્દિતમ્
અભવન્ક્ષુભિતાઃ સર્વે માત્સર્યાદ્દૈત્યરાક્ષસાઃ ॥ ૩૩॥

સમ્પ્રધાર્ય ચ તેઽન્યોન્યમિત્યવોચન્નવસ્થિતાઃ ।
નિર્ગીતં તુ સવાદિત્રમિદં ગૃહ્ણીમહે વયમ્ ॥૩૪॥

સપ્તરૂપેણ સન્તુષ્ટા દેવાઃ કર્માનુકીર્તનાત્ ।
વયં ગૃહ્ણીમ નિર્ગીતં તુષ્યામોઽત્રૈવ સર્વદા ॥ ૩૫॥

તે તત્ર તુષ્ટા દૈત્યાસ્તુ સાધયન્તિ પુનઃ પુનઃ ।
રુષ્ટાશ્ચાપિ તતો દેવાઃ પ્રત્યભાષન્ત નારદમ્ ॥ ૩૬॥

એતે તુષ્યન્તિ નિર્ગીતે દાનવા સહ રાક્ષસૈઃ ।

પ્રણશ્યતુ પ્રયોગોઽયં કથં વા મન્યતે ભવાન્ ॥ ૩૭॥

દેવાનાં વચનં શ્રુત્વા નારદો વાક્યમબ્રવીત્ ।
ધાતુવાદ્યાશ્રયકૃતં નિર્ગીતં મા પ્રણશ્યતુ ॥ ૩૮॥

કિન્તૂપોહનસંયુક્તં ધાતુવાદ્યવિભૂષિતમ્ ।
ભવિષ્યતીદં નિર્ગીતં સપ્તરૂપવિધાનતઃ ॥ ૩૯॥

નિર્ગીતેનાવબદ્ધાશ્ચ દૈત્યદાનવરાક્ષસાઃ ।
ન ક્ષોભં ન વિઘાતં ચ કરિષ્યન્તીહ તોષિતાઃ ॥ ૪૦॥

એવં નિર્ગીતમેતત્તુ દૈત્યાનાં સ્પર્ધયા દ્વિજાઃ ।
દેવાનાં બહુમાનેન બહિર્ગીતમિતિ સ્મૃતમ્ ॥ ૪૧॥

ધાતુભિશ્ચિત્રવીણાયાં ગુરુલઘ્વક્ષરાન્વિતમ્ ।
વર્ણાલઙ્કારસંયુક્તં પ્રયોક્તવ્યં બુધૈરથ ॥ ૪૨॥

નિર્ગીતં ગેયતે યસ્માદપદં વર્ણયોજનાત્ ।
અસૂયયા ચ દેવાનાં બહિર્ગીતમિદં સ્મૃતમ્ ॥૪૩॥

નિર્ગીતં યન્મયા પ્રોક્તં સપ્તરૂપસમન્વિતમ્ ।
ઉત્થાપનાદિકં યચ્ચ તસ્ય કારણમુચ્યતે ॥ ૪૪॥

આશ્રાવણાયાં યુક્તાયાં દૈત્યાસ્તુષ્યન્તિ નિત્યશઃ ।
વક્ત્રપાણૌ કૃતે ચૈવ નિત્યં તુષ્યન્તિ દાનવાઃ ॥ ૪૫॥

પરિઘટ્ટનયા તુષ્ટા યુક્તાયાં રાક્ષસાં ગણાઃ ।
સઙ્ઘોટનક્રિયાયાં ચ તુષ્યન્ત્યપિ ચ ગુહ્યકાઃ ॥ ૪૬॥

માર્ગાસારિતમાસાદ્ય તુષ્ટા યક્ષા ભવન્તિ હિ ।
ગીતકેષુ પ્રયુક્તેષુ દેવાસ્તુષ્યન્તિ નિત્યશઃ ॥૪૭॥

વર્ધમાને પ્રયુક્તે તુ રુદ્રસ્તુષ્યતિ સાનુગઃ ।
તથા ચોત્થાપને યુક્તે બ્રહ્મા તુષ્ટો ભવેદિહ ॥ ૪૮॥

તુષ્યન્તિ લોકપાલાશ્ચ પ્રયુક્તે પરિવર્તને ।
નાન્દીપ્રયોગેઽથ કૃતે પ્રીતો ભવતિ ચન્દ્રમાઃ ॥ ૪૯॥

યુક્તાયામવકૃષ્ટાયાં પ્રીતા નાગા ભવન્તિ હિ ।
તથા શુષ્કાવકૃષ્ટાયાં પ્રીતઃ પિતૃગણો ભવેત્ ॥૫૦॥

રઙ્ગદ્વારે પ્રયુક્તે તુ વિષ્ણુઃ પ્રીતો ભવેદિહ ।
જર્જરસ્ય પ્રયોગે તુ તુષ્ટા વિઘ્નવિનાયકાઃ ॥ ૫૧॥

તથા ચાર્યા પ્રયુક્તાયામુમા તુષ્ટા ભવેદિહ ।
મહાચાર્યા પ્રયુક્તાયાં તુષ્ટો ભૂતગણો ભવેત્ ॥ ૫૨॥

આશ્રાવણાદિચાર્યન્તમેતદ્દૈવતપૂજનમ્ ।
પૂર્વરઙ્ગે મયા ખ્યાતં તથા ચાઙ્ગવિકલ્પનમ્ ॥ ૫૩॥

દેવસ્તુષ્યન્તિ યો યેન યસ્ય યન્મનસઃ પ્રિયમ્ ।
તત્તથા પૂર્વરઙ્ગે તુ મયા પ્રોક્તં દ્વિજોત્તમાઃ ॥ ૫૪॥

સર્વદૈવતપૂજાર્હં સર્વદૈવતપૂજનમ્ ।
ધન્યં યશસ્યમાયુષ્યં પૂર્વરઙ્ગપ્રવર્તનમ્ ॥૫૫॥

દૈત્યદાનવતુષ્ટ્યર્થં સર્વેષાં ચ દિવૌકસામ્ ।
નિર્ગીતાનિ સગીતાનિ પૂર્વરઙ્ગકૃતાનિ તુ ॥ ૫૬॥

[યા વિદ્યા યાનિ શિલ્પાનિ યા ગતિર્યશ્ચ ચેષ્ટિતમ્ ।
લોકાલોકસ્ય જગતસ્તદસ્મિન્નાટકાશ્રયે ॥ ]
નિર્ગીતાનાં સગીતાનાં વર્ધમાનસ્ય ચૈવ હિ ।
ધ્રુવાવિધાને વક્ષ્યામિ લક્ષણં કર્મ ચૈવ હિ ॥ ૫૭॥

પ્રયુજ્ય ગીતકવિધિં વર્ધમાનમથાપિ ચ ।
ગીતકાન્તે તતશ્ચાપિ કાર્યા હ્યુત્થાપની ધ્રુવા ॥ ૫૮॥

અદૌ દ્વે ચ ચતુર્થં ચાપ્યષ્ટમૈકાદશે તથા ।
ગુર્વક્ષરાણિ જાનીયત્પાદે હ્યેકાદશે તથા ॥ ૫૯॥

ચતુષ્પદા ભવેત્સા તુ ચતુરશ્રા તથૈવ ચ ।
ચતુર્ભિસ્સન્નિપાતૈશ્ચ ત્રિલયા ત્રિયતિસ્તથા ॥ ૬૦॥

પરિવર્તાશ્ચ ચત્વારઃ પાણયસ્ત્રય એવ ચ ।
જાત્યા ચૈવ હિ વિશ્લોકા તાં ચ તાલેન યોજયેત્ ॥ ૬૧॥

શમ્યા તુ દ્વિકલા કાર્યા તલો દ્વિકલ એવ ચ ।
પુનશ્ચૈકકલા શમ્યા સન્નિપાતઃ કલાત્રયમ્ ॥ ૬૨॥

એવમષ્ટકલઃ કાર્યઃ સન્નિપાતો વિઅચક્ષણૈઃ ।
ચત્વારઃ સન્નિપાતાશ્ચ પરિવર્તઃ સ ઉચ્યતે ॥ ૬૩॥

પૂર્વં સ્થિતલયઃ કાર્યઃ પરિવર્તો વિચક્ષણૈઃ ।
તૃતીયે સન્નિપાતે તુ તસ્યા ભાણ્ડગ્રહો ભવેત્ ॥ ૬૪॥

એકસ્મિન્પરિવર્તે તુ ગતે પ્રાપ્તે દ્વિતીયકે ।
કાર્યં મધ્યલયે તજ્જ્ઞૈઃ સૂત્રધારપ્રવેશનમ્ ॥ ૬૫॥

પુષ્પાઞ્જલિં સમાદાય રક્ષામઙ્ગલસંસ્કૃતાઃ ।
શુદ્ધવસ્ત્રાઃ સુમનસસ્તથા ચાદ્ભુતદૃષ્ટયઃ ॥ ૬૬॥

સ્થાનન્તુ વૈષ્ણવં કૃત્વા સૌષ્ઠવાઙ્ગપુરસ્કૃતમ્ ।
દીક્ષિતાઃ શુચયશ્ચૈવ પ્રવિશેયુઃ સમં ત્રયઃ ॥ ૬૭॥

ભૃઙ્ગારજર્જરધરૌ ભવેતાં પારિપાર્શ્વિકૌ ।
મધ્યે તુ સૂત્રભૃત્તાભ્યાં વૃત્તઃ પઞ્ચપદીં વ્રજેત્ ॥ ૬૮॥

પદાનિ પઞ્ચ ગચ્છેયુર્બ્રહ્મણો યજનેચ્છયા ।
પદાનાઞ્ચાપિ વિક્ષેપં વ્યાખ્યાસ્યામ્યનુપૂર્વશઃ ॥ ૬૯॥

ત્રિતાલાન્તરવિષ્કમ્ભમુત્ક્ષિપેચ્ચરણં શનૈઃ
પાર્શ્વોત્થાનોત્થિતં ચૈવ તન્મધ્યે પાતયેત્પુનઃ ॥ ૭૦॥

એવં પઞ્ચપદીં ગત્વા સૂત્રધારઃ સહેતરઃ ।
સૂચીં વામપદે દદ્યાદ્વિક્ષેપં દક્ષિણેન ચ ॥ ૭૧॥

પુષ્પાઞ્જલ્યપવર્ગશ્ચ કાર્યો બ્રાહ્મેઽથ મણ્ડલે ।
રઙ્ગપીઠસ્ય મધ્યે તુ સ્વયં બ્રહ્મા પ્રતિષ્ઠિતઃ ॥ ૭૨॥

તતઃ સલલિતૈર્હસ્તૈરભિવન્દ્ય પિતામહમ્ ।
અભિવાદાનિ કાર્યાણિ ત્રીણિ હસ્તેન ભૂતલે ॥ ૭૩॥

કાલપ્રકર્ષહેતોશ્ચ પાદાનાં પ્રવિભાગતઃ ।
સૂત્રધારપ્રવેશાદ્યો વન્દનાભિનયાન્તકઃ ॥ ૭૪॥

દ્વિતીયઃ પરિવર્તસ્તુ કાર્યો મધ્યલયાશ્રિતઃ ।
તતઃ પરં તૃતીયે તુ મણ્ડલસ્ય પ્રદક્ષિણમ્ ॥ ૭૫॥

ભવેદાચમનં ચૈવ જર્જરગ્રહણં તથા ।
ઉત્થાય મણ્ડલાત્તૂર્ણં દક્ષિણં પાદમુદ્ધરેત્ ॥ ૭૬॥

વેધં તેનૈવ કુર્વીત વિક્ષેપં વામકેન ચ ।
પુનશ્ચ દક્ષિણં પાદં પાર્શ્વસંસ્થં સમુદ્ધરેત્ ॥ ૭૭॥

તતશ્ચ વામવેધસ્તુ વિક્ષેપો દક્ષિણસ્ય ચ ।
ઇત્યનેન વિધાનેન સમ્યક્કૃત્વા પ્રદિક્ષણમ્ ॥ ૭૮॥

ભૃઙ્ગારભૃતમાહૂય શૌચં ચાપિ સમાચરેત્ ।
યથાન્યાયં તુ કર્તવ્યા તેન હ્યાચમનક્રિયા ॥ ૭૯॥

આત્મપ્રોક્ષણમેવાદ્ભિઃ કર્તવ્યં તુ યથાક્રમમ્ ।
પ્રયત્નકૃતશૌચેન સૂત્રધારેણ યત્નતઃ ॥ ૮૦॥

સન્નિપાતસમં ગ્રાહ્યો જર્જરો વિઘ્નજર્જરઃ ।
પ્રદક્ષિણાદ્યો વિજ્ઞેયો જર્જરગ્રહણાન્તકઃ ॥ ૮૧॥

તૃતીયઃ પરિવર્તસ્તુ વિજ્ઞેયો વૈ દ્રુતે લયે ।
ગૃહીત્વા જર્જરં ત્વષ્ટૌ કલા જપ્યં પ્રયોજયેત્ ॥ ૮૨॥

વામવેધં તતઃ કુર્યાદ્વિક્ષેપં દક્ષિણસ્ય ચ ।
તતઃ પઞ્ચપદીં ચૈવ ગચ્છેત્તુ કુતપોન્મુખઃ ॥ ૮૩॥

વામવેધસ્તુ તત્રાપિ વિક્ષેપો દક્ષિણસ્ય તુ ।
જર્જરગ્રહણાદ્યોઽયં કુતપાભિમુખાન્તકઃ ॥ ૮૪॥

ચતુર્થઃ પરિવર્તસ્તુ કાર્યો દ્રુતલયે પુનઃ ।
કરપાદનિપાતાસ્તુ ભવન્ત્યત્ર તુ ષોડશ ॥ ૮૫॥

ત્ર્યશ્રે દ્વાદશ પાતાસ્તુ ભવન્તિ કરપાદયોઃ ।
વન્દનાન્યથ કાર્યાણિ ત્રીણિ હસ્તેન ભૂતલે ॥ ૮૬॥

આત્મપ્રોક્ષણમદ્ભિશ્ચ ત્ર્યશ્રે નૈવ વિધીયતે ।
એવમુત્થાપનં કાર્યં તતસ્તુ પરિવર્તનમ્ ॥ ૮૭॥

ચતુરશ્રં લયે મધ્યે સન્નિપાતૈરથાષ્ટભિઃ ।
યસ્યા લઘૂનિ સર્વાણિ કેવલં નૈધનં ગુરુ ॥ ૮૮॥

ભવેદતિજગત્યાન્તુ સા ધ્રુવા પરિવર્તની ।
વાર્તિકેન તુ માર્ગેણ વાદ્યેનાનુગતેન ચ ॥ ૮૯॥

લલિતૈઃ પાદવિન્યાસૈર્વન્દ્યા દેવા યથાદિશમ્ ।
દ્વિકલં પાદપતનં પાદચાર્યા ગતં ભવેત્ । ૯૦॥

વામપાદેન વેધસ્તુ કર્તવ્યો નૃત્તયોક્તૃભિઃ ।

દ્વિતાલાન્તરવિષ્કમ્ભો વિક્ષેપો દક્ષિણસ્ય ચ ॥ ૯૧॥

તતઃ પઞ્ચપદીં ગચ્છેદતિક્રાન્તૈઃ પદરથ ।
તતોઽભિવાદનં કુર્યાદ્દેવતાનાં યથાદિશમ્ ॥ ૯૨॥

વન્દેત પ્રથમં પૂર્વાં દિશં શક્રાધિદૈવતામ્ ।
દ્વિતીયાં દક્ષિણામાશાં વન્દેત યમદેવતામ્ ॥ ૯૩॥

વન્દેત પશ્ચિમામાશાં તતો વરુણદૈવતામ્ ।
ચતુર્થીમુત્તરામાશાં વન્દેત ધનદાશ્રયામ્ ॥ ૯૪॥

દિશાં તુ વન્દનં કૃત્વા વામવેધં પ્રયોજયેત્ ।
દક્ષિણેન ચ કર્તવ્યં વિક્ષેપપરિવર્તનમ્ ॥ ૯૫॥

પ્રાઙ્ગ્મુખસ્તુ તતઃ કુર્યાત્પુરુષસ્ત્રીનપુંસકૈઃ ।
ત્રિપધા સૂત્રભૃદ્રુદ્રબ્રહ્મોપેન્દ્રાભિવાદનમ્ ॥ ૯૬॥

દક્ષિણં તુ પદં પુંસો વામં સ્ત્રીણાં પ્રકીર્તિતમ્ ।
પુનર્દક્ષિણમેવ સ્યાન્નાત્યુત્ક્ષિપ્તં નપુંસકમ્ ॥ ૯૭॥

વન્દેત પૌરુષેણેશં સ્ત્રીપદેન જનાર્દનમ્ ।
નપુંસકપદેનાપિ તથૈવામ્બુજસમ્ભવમ્ ॥ ૯૮॥

પરિવર્તનમેવં સ્યાત્તસ્યાન્તે પ્રવિશેત્તતઃ ।
ચતુર્થકારઃ પુષ્પાણિ પ્રગૃહ્ય વિધિપૂર્વકમ્ ॥ ૯૯॥

યથાવત્તેન કર્તવ્યં પૂજનં જર્જરસ્ય તુ ।
કુતપસ્ય ચ સર્વસ્ય સૂત્રધારસ્ય ચૈવ હિ ॥ ૧૦૦॥

તસ્ય ભાણ્ડસમઃ કાર્યસ્તજ્જ્ઞૈર્ગતિપરિક્રમઃ ।
ન તત્ર ગાનં કર્તવ્યં તત્ર સ્તોભક્રિયા ભવેત્ ॥ ૧૦૧॥

ચતુર્થકારઃ પૂજાં તુ સ કૃત્વાન્તર્હિતો ભવેત્ ।
તતો ગેયાવકૃષ્ટા તુ ચતુરશ્રા સ્થિતા ધ્રુવા ॥ ૧૦૨॥

ગુરુપ્રાયા તુ સા કાર્યા તથા ચૈવાવપાણિકા ।
સ્થાયિવર્ણાશ્રયોપેતા કલાષ્ટકવિનિર્મિતા ॥ ૧૦૩॥

[ચતુર્થં પઞ્ચમં ચૈવ સપ્તમં ચાષ્ટમં તથા ।
લઘૂનિ પાદે પઙ્ક્ત્યાન્તુ સાવકૃષ્ટા ધ્રુવા સ્મૃતા ॥ ]
સૂત્રધારઃ પઠેત્તત્ર મધ્યમં સ્વરમાશ્રિતઃ ।

નાન્દીં પદૈર્દ્વાદશભિરષ્ટભિર્વાઽપ્યલઙ્કૃતામ્ ॥ ૧૦૪॥

નમોઽસ્તુ સર્વદેવેભ્યો  દ્વિજાતિભ્યઃ શુભં તથા ।
જિતં સોમેન વૈ રાજ્ઞા શિવં  ગોબ્રાહ્મણાય ચ ॥  ૧૦૫॥

બ્રહ્મોત્તરં તથૈવાસ્તુ હતા બ્રહ્મદ્વિષસ્તથા ।
પ્રશાસ્ત્વિમાં મહારાજઃ પૃથિવીં ચ સસાગરામ્ ॥ ૧૦૬॥

રાષ્ટ્રં પ્રવર્ધતાં ચૈવ રઙ્ગસ્યાશા સમૃદ્ધ્યતુ ।
પ્રેક્ષાકર્તુર્મહાન્ધર્મો ભવતુ બ્રહ્મભાષિતઃ ॥ ૧૦૭॥

કાવ્યકર્તુર્યશશ્ચાસ્તુ ધર્મશ્ચાપિ પ્રવર્ધતામ્ ।
ઇજ્યયા ચાનયા નિત્યં પ્રીયન્તાં દેવતા ઇતિ ॥ ૧૦૮॥

નાન્દીપદાન્તરેષ્વેષુ હ્યેવમાર્યેતિ નિત્યશઃ ।
વદેતાં સમ્યગુક્તાભિર્વાગ્ભિસ્તૌ પારિપાર્શ્વિકૌ ॥  ૧૦૯॥

એવં  નાન્દી વિધાતવ્યા યથાવલ્લક્ષણાન્વિતા ।
તતશ્શુષ્કાવકૃષ્ટા સ્યાજ્જર્જરશ્લોકદર્શિકા ॥ ૧૧૦॥

નવં ગુર્વાક્ષરાણ્યાદૌ ષડ્લઘૂનિ ગુરુત્રયમ્ ।
શુષ્કાવકૃષ્ટા તુ ભવેત્કલા હ્યષ્ટૌ પ્રમાણતઃ ॥ ૧૧૧॥

યથા -
દિગ્લે  દિગ્લે દિગ્લે દિગ્લે જમ્બુકપલિતકતે તેચામ્ ।
કૃત્વા શુષ્કાવકૃષ્ટાં તુ યથાવદ્વિજસત્તમાઃ ॥  ૧૧૨॥

તતઃ શ્લોકં પઠેદેકં ગમ્ભીરસ્વરસંયુતમ્ ।
દેવસ્તોત્રં  પુરસ્કૃત્ય યસ્ય પૂજા પ્રવર્તતે ॥ ૧૧૩॥

રાજ્ઞો વા યત્ર ભક્તિઃ સ્યાદથ વા બ્રાહ્મણસ્સ્તવમ્ ।
ગદિત્વા જર્જરશ્લોકં રઙ્ગદ્વારે ચ યત્સ્મૃતમ્ ॥ ૧૧૪॥

પઠેદન્યં પુનઃ શ્લોકં જર્જરસ્ય વિનાશનમ્ ।
જર્જરં નમયિત્વા તુ તતશ્ચારીં પ્રયોજયેત્ ॥ ૧૧૫॥

પારિપાર્શ્વિકયોશ્ચ સ્યાત્પશ્ચિમેનાપસર્પણમ્ ।
અઙ્કિતા ચાત્ર કર્તવ્યા ધ્રુવા મધ્યલયાન્વિતા ॥ ૧૧૬॥

ચતુર્ભિઃ સન્નિપાતૈશ્ચ ચતુરશ્રા પ્રમાણતઃ ।
આદ્યમન્ત્યં ચતુર્થં ચ પઞ્ચમં ચ તથા ગુરુ ॥ ૧૧૭॥

યસ્યાં હ્રસ્વાનિ શેષાણિ સા જ્ઞેયા ત્વઙ્ગિતા બુધૈઃ ।
અસ્યાઃ પ્રયોગં વક્ષ્યામિ યથા પૂર્વં મહેશ્વરઃ ॥ ૧૧૮॥

સહોમયા ક્રીડિતવાન્નાનાભાવવિચેષ્ટતૈઃ ।
કૃત્વાઽવહિત્થં સ્થાનં તુ વામં ચાધોમુખં ભુજમ્ ॥ ૧૧૯॥

ચતુરશ્રમુરઃ કાર્યમઞ્ચિતશ્ચાપિ મસ્તકઃ ।
નાભિપ્રદેશે વિન્યસ્ય જર્જરં ચ તુલાધૃતમ્ ॥ ૧૨૦॥

વામપલ્લવહસ્તેન પાદૈસ્તાલાન્તરોત્થિતૈઃ ।
ગચ્છેત્પઞ્ચપદીં ચૈવ સવિલાસાઙ્ગચેષ્ટિતૈઃ ॥ ૧૨૧॥

વામવેધસ્તુ કર્તવ્યો વિક્ષેપો દક્ષિણસ્ય ચ ।
શૃઙ્ગારરસસંયુક્તાં પઠેદાર્યાં વિચક્ષણઃ ॥ ૧૨૨॥

ચારીશ્લોકં ગદિત્વા તુ કૃત્વા ચ પરિવર્તનમ્ ।
તૈરેવ ચ પદઃ કાર્યં પશ્ચિમેનાપસર્પણમ્ ॥ ૧૨૩॥

પારિપાર્શ્વિકહસ્તે તુ ન્યસ્ય જર્જરમુત્તમમ્ ।
મહાચારીં તતશ્ચૈવ પ્રયુઞ્જીત યથાવિધિ ॥ ૧૨૪॥

ચતુરશ્રા ધ્રુવા તત્ર તથા દ્રુતલયાન્વિતા ।
ચતુર્ભિસ્સન્નિપાતૈશ્ચ કલા હ્યષ્ટૌ પ્રમાણતઃ ॥ ૧૨૫॥

આદ્યં ચતુર્થમન્ત્યં ચ સપ્તમં દશમં ગુરુ ।
લઘુ શેષં ધ્રુવાપાદે ચતુર્વિંશતિકે ભવેત્ ॥ ૧૨૬॥

(યથા-)

પાદતલાહતિપાતિતશૈલં
ક્ષોભિતભૂતસમગ્રસમુદ્રમ્ ।
તાણ્ડવનૃત્યમિદં પ્રલયાન્તે
પાતુ જગત્સુખદાયિ હરસ્ય ॥ ૧૨૭॥

ભાણ્ડોન્મુખેન કર્તવ્યં પાદવિક્ષેપણં તતઃ ।
સૂચીં કૃત્વા પુનઃ કુર્યાદ્વિક્ષેપપરિવર્તનમ્ ॥ ૧૨૮॥

અતિક્રાન્તૈઃ સલલિતૈઃ પાદૈર્દ્રુતલયાન્વિતૈઃ ।
ત્રિતાલાન્તરમુત્ક્ષેપૈર્ગચ્છેત્પઞ્ચપદીં તતઃ ॥ ૧૨૯॥

તત્રાપિ વામવેધસ્તુ વિક્ષેપો દક્ષિણસ્ય ચ ।
તૈરેવ ચ પદૈઃ કાર્યં પ્રાઙ્મુખેનાપસર્પણમ્ ॥ ૧૩૦॥

પુનઃ પદાનિ ત્રીણ્યેવ ગચ્છેત્પ્રાઙ્મુખ એવ તુ ।
તતશ્ચ વામવેધઃ સ્યાદ્વિક્ષેપો દક્ષિણસ્ય ચ ॥ ૧૩૧॥

તતો રૌદ્રરસં શ્લોકં પાદસંહરણં પઠેત્ ।
તસ્યાન્તે તુ ત્રિપદ્યાથ વ્યાહરેત્પારિપાર્શ્વિકૌ ॥ ૧૩૨॥

તયોરાગમને કાર્યં ગાનં નર્કુટકં બુધૈઃ ।
તથા ચ ભારતીભેદે ત્રિગતં સમ્પ્રયોજયેત્ ॥ ૧૩૩॥

વિદૂષકસ્ત્વેકપદાં સુત્રધારસ્મિતાવહામ્ ।
અસમ્બદ્ધકથાપ્રાયાં કુર્યાત્કથનિકા તતઃ ॥ ૧૩૪॥

(વિતણ્ડાં ગણ્ડસંયુક્તાં તાલિકાઞ્ચ પ્રયોજયેત્ ।
કસ્તિષ્ઠતિ જિતં કેનેત્યાદિકાવ્યપ્રરૂપિણીમ્ ॥

પારિપાર્શ્વકસઞ્જલ્પો વિદૂષકવિરૂપિતઃ ।
સ્થાપિતઃ સૂત્રધારેણ ત્રિગતં સમ્પ્રયુજ્યતે ॥)
પ્રરોચના ચ કર્તવ્યા સિદ્ધેનોપનિમન્ત્રણમ્ ।
રઙ્ગસિદ્ધૌ પુનઃ કાર્યં કાવ્યવસ્તુનિરૂપણમ્ ॥ ૧૩૫॥

સર્વમેવ વિધિં કૃત્વા સૂચીવેધકૃતૈરથ ।
પાદૈરનાવિદ્ધગતૈર્નિષ્ક્રામેયુઃ સમં ત્રયઃ ॥ ૧૩૬॥

એવમેષ પ્રયોક્તવ્યઃ પૂર્વરઙ્ગો યથાવિધિ ।
ચતુરશ્રો દ્વિજશ્રેષ્ઠાસ્ત્ર્યશ્રં ચાપિ નિબોધત ॥ ૧૩૭॥

અયમેવ પ્રયોગઃ સ્યાદઙ્ગાન્યેતાનિ ચૈવ હિ ।
તાલપ્રમાણં સંક્ષિપ્તં કેવલં તુ વિશેષકૃત્ ॥ ૧૩૮॥

શમ્યા તુ દ્વિકલા કાર્યા તાલો હ્યેકકલસ્તથા ।
પુનશ્ચૈકકલા શમ્યા સન્નિપાતઃ કલાદ્વયમ્ ॥ ૧૩૯॥

અનેન હિ પ્રમાણેન કલાતાલલયાન્વિતઃ ।
કર્તવ્યઃ પૂર્વરઙ્ગસ્તુ ત્ર્યશ્રોઽપ્યુત્થાપનાદિકઃ ॥ ૧૪૦॥

આદ્યં ચતુર્થં દશમમષ્ટમં નૈધનં ગુરુ ।
યસ્યાસ્તુ જાગતે પાદે સા ત્ર્યશ્રોત્થાપિની ધ્રુવા ॥ ૧૪૧॥

વાદ્યં ગતિપ્રચારશ્ચ ધ્રુવા તાલસ્તથૈવ ચ ।
સંક્ષિપ્તાન્યેવ કાર્યાણિ ત્ર્યશ્રે નૃત્તપ્રવેદિભિઃ ॥ ૧૪૨॥

વાદ્યગીતપ્રમાણેન કુર્યાદઙ્ગવિચેષ્ટિતમ્ ।
વિસ્તીર્ણમથ સંક્ષિપ્તં દ્વિપ્રમાણવિનિર્મિતમ્ ॥ ૧૪૩॥

હસ્તપાદપ્રચારસ્તુ દ્વિકલઃ પરિકીર્તિતઃ ।
ચતુરશ્રે પરિક્રાન્તે પાતાઃ સ્યુઃ ષોડશૈવ તુ ॥ ૧૪૪॥

ત્ર્યશ્રે દ્વાદશ પાતાસ્તુ ભવન્તિ કરપાદયોઃ ।
એતત્પ્રમાણં વિજ્ઞેયમુભયોઃ પૂર્વરઙ્ગયોઃ ॥ ૧૪૫॥

કેવલં પરિવર્તે તુ ગમને ત્રિપદી ભવેત્ ।
દિગ્વન્દને પઞ્ચપદી ચતુરશ્રે વિધીયતે ॥ ૧૪૬॥

આચાર્યબુદ્ધ્યા કર્તવ્યસ્ત્ર્યશ્રસ્તાલપ્રમાણતઃ ।
તસ્માન્ન લક્ષણં પ્રોક્તં પુનરુક્તં ભવેદ્યતઃ ॥ ૧૪૭॥

એવમેષ પ્રયોક્તવ્યઃ પૂર્વરઙ્ગો દ્વિજોત્તમાઃ ।
ત્ર્યશ્રશ્ચ ચતુરશ્રશ્ચ શુદ્ધો ભારત્યુપાશ્રયઃ ॥ ૧૪૮॥

એવં તાવદયં શુદ્ધઃ પૂર્વરઙ્ગો મયોદિતઃ ।
ચિત્રત્વમસ્ય વક્ષ્યામિ યથાકાર્યં પ્રયોક્તૃભિઃ ॥ ૧૪૯॥

વૃત્તે હ્યુત્થાપને વિપ્રાઃ કૃતે ચ પરિવર્તને ।
ચતુર્થકારદત્તાભિઃ સુમનોભિરલઙ્કૃતે ॥ ૧૫૦॥

ઉદાત્તૈર્ગાનૈર્ગન્ધર્વૈઃ પરિગીતે પ્રમાણતઃ ।
દેવદુન્દુભયશ્ચૈવ નિનદૈયુર્ભૃશં યતઃ ॥ ૧૫૧॥

સિદ્ધાઃ કુસુમમાલાભિર્વિકિરેયુઃ સમન્તતઃ ।
અઙ્ગહારૈશ્ચ દેવ્યસ્તા ઉપનૃત્યેયુરગ્રતઃ ॥ ૧૫૨॥

યસ્તાણ્ડવવિધિઃ પ્રોક્તો નૃતે પિણ્ડીસમન્વિતઃ ।
રેચકૈરઙ્ગહારૈશ્ચ ન્યાસોપન્યાસસંયુતઃ ॥ ૧૫૩॥

નાન્દીપદાનાં મધ્યે તુ એકૈકસ્મિન્પૃથક્પૃથક્ ।
પ્રયોક્તવ્યો બુધૈઃ સમ્યક્ચિત્રભાવમભીપ્સુભિઃ ॥ ૧૫૪॥

એવં કૃત્વા યથાન્યાયં શુદ્ધં ચિત્રં પ્રયત્નતઃ ।
તતઃપરં પ્રયુઞ્જીત નાટકં લક્ષણાન્વિતમ્ ॥ ૧૫૫॥

તતસ્ત્વન્તર્હિતાઃ સર્વા ભવેયુર્દિવ્યયોષિતઃ ।
નિષ્ક્રાન્તાસુ ચ સર્વાસુ નર્તકીષુ તતઃ પરમ્ ॥ ૧૫૬॥

પૂર્વરઙ્ગે પ્રયોક્તવ્યમઙ્ગજાતમતઃપરમ્ ।
એવં શુદ્ધો ભવેચ્ચિત્રઃ પૂર્વરઙ્ગો વિધાનતઃ ॥ ૧૫૭॥

કાર્યો નાતિપ્રસઙ્ગોઽત્ર નૃતાગીતવિધિં પ્રતિ ।
ગીતે વાદ્યે ચ નૃત્તે ચ પ્રવૃત્તેઽતિપ્રસઙ્ગતઃ ॥ ૧૫૮॥

ખેદો ભવેત્પ્રયોક્તૃણાં પ્રેક્ષકાણાં તથૈવ ચ ।
ખિન્નાનાં રસભાવેષુ સ્પષ્ટતા નોપજાયતે ॥ ૧૫૯॥

તતઃ શેષપ્રયોગસ્તુ ન રાગજનકો ભવેત્ ।
(લક્ષનેન વિના બાહ્યલક્ષણાદ્વિસ્તૃતં ભવેત્ ॥

લોકશાસ્ત્રાનુસારેણ તસ્માન્નાટ્યં પ્રવર્તતે ॥ )
ત્ર્યશ્રં વા ચતુરશ્રં વા શુદ્ધં ચિત્રમથાપિ વા ॥ ૧૬૦॥

પ્રયુજ્ય રઙ્ગાન્નિષ્ક્રામેત્સૂત્રધારઃ સહાનુગઃ ।
(દેવપાર્થિવરઙ્ગાનામાશીર્વચનસંયુતામ્ ॥

કવેર્નામગુણોપેતાં વસ્તૂપક્ષેપરૂપિકામ્ ।
લઘુવર્ણપદોપેતાં વૃત્તૈશ્ચિત્રૈરલઙ્કૃતામ્ ॥

અન્તર્યવનિકાસંસ્થઃ કુર્યાદાશ્રાવણાં તતઃ ।
આશ્રાવનાવસાને ચ નાન્દીં કૃત્વા સ સૂત્રધૃત્ ॥

પુનઃ પ્રવિશ્ય રઙ્ગં તુ કુર્યાત્પ્રસ્તાવનાં તતઃ ।)
પ્રયુજ્ય વિધિનૈવં તુ પૂર્વરઙગં પ્રયોગતઃ ॥ ૧૬૧॥

સ્થાપકઃ પ્રવિશેત્તત્ર સૂત્રધારગુણાકૃતિઃ ।
સ્થાનં તુ વૈષ્ણવં કૃત્વા સૌષ્ઠવાઙ્ગપુરસ્કૃતમ્ ॥ ૧૬૨॥

પ્રવિશ્ય રઙ્ગં તૈરેવ સૂત્રધારપદૈર્વ્રજેત્ ।
શ્થાપકસ્ય પ્રવેશે તુ કર્તવ્યઽર્થાનુગા ધ્રુવા ॥ ૧૬૩॥

ત્ર્યશ્રા વા ચતુરશ્રા વા તજ્જ્ઞૈર્મધ્યલયાન્વિતા ।
કુર્યાદનન્તરં ચારીં દેવરહ્મણશંસિનીમ્ ॥ ૧૬૪॥

સુવાક્યમધુરૈઃ શ્લોકેર્નાનાભસવરસાન્વિતૈઃ ।

પ્રસાદ્ય રઙ્ગં વિધિવત્કવેર્નામ ચ કીર્તયેત્ ॥ ૧૬૫॥

પ્રસ્તવા। તતઃ કુર્યાત્કાવ્યપ્રખ્યાપનાશ્રયામ્ ।
ઉદ્ઘાત્યકાદિ કર્તવ્યં કાવ્યોપક્ષેપણાશ્રયમ્ ॥૧૬૬॥

દિવ્યે દિવ્યાશ્રયો ભૂત્વા માનુષે માનુષાશ્રયઃ ।
દિવ્યમાનુષસંયોગે દિવ્યો વા માનુષોઽપિ વા ॥ ૧૬૭॥

મુખબીજાનુસદૃશં નાનામાર્ગસમાશ્રયમ્ ।
આવિધૈરુપક્ષેપૈઃ કાવ્યોપક્ષેપણં ભવેત્ ॥૧૬૮॥

પ્રસ્તાવ્યૈવં તુ નિષ્ક્રામેત્કાવ્યપ્રસ્તાવકસ્તતઃ ।
એવમેષ પ્રયોક્તવ્યઃ પૂર્વરઙ્ગો યથાવિધિ ॥ ૧૬૯॥

ય ઇમં પૂર્વરઙ્ગં તુ વિધિનૈવ પ્રયોજયેત્ ।
નાશુભં પ્રાપ્નુયાત્કિઞ્ચિત્સ્વર્ગલોકં ચ ગચ્છતિ ॥ ૧૭૦॥

યશ્ચાપિ વિધિમુત્સૃજ્ય યથેષ્ટં સમ્પ્રયોજયેત્ ।
પ્રાપ્નોત્યપચયં ઘોરં તિર્યગ્ગ્યોનિં ચ ગચ્છતિ ॥ ૧૭૧॥

ન તથાઽગ્નિઃ પ્રદહતિ પ્રભઞ્જનસમીરતઃ ।
યથા હ્યપ્રયોગસ્તુ પ્રયુક્તો દહતિ ક્ષણાત્ ॥ ૧૭૨॥

ઇત્યેવાવન્તિપાઞ્ચાલદાક્ષિણાત્યૌઢ્રમાગધૈઃ ।
કર્તવ્ય પૂર્વરઙ્ગસ્તુ દ્વિપ્રમાણવિનિર્મિતઃ ॥ ૧૭૩॥

એષ વઃ કથિતો વિપ્રાઃ પૂર્વરઙ્ગાશ્રિતો વિધિઃ ।
ભૂયઃ કિં કથ્યતાં સમ્યઙ્નાટ્યવેદવિધિં પ્રતિ ॥ ૧૭૪॥

ઇતિ ભારતીયે નાટ્યશાસ્ત્રે પૂર્વરઙ્ગપ્રયોગો નામ પઞ્ચમોઽધ્યાયઃ ।

Encoded by Padmakar Dadegaonkar dadegaonkar@yahoo.com

*Natya Shastra Chapter 5*

pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*